26. ॥ सहयुक्तेऽप्रधाने ॥

भट्टोजिदीक्षितप्रणीतायाः वैयाकरणसिद्धान्तकौमुद्याः विभ-
क्त्यर्थप्रकरणे पठितमिदं सूत्रम्। सूत्रे अस्मिन् 'कर्तृकरणयोस्तृतीया'
इति सूत्रतः तृतीयेति पदमनुवर्तनीयम्। युक्तं योगः। सहयुक्ते
सहार्थेन योगे इत्यर्थः। ननु कथमिह अर्थग्रहणम्? अत्रोक्त-
मन्यथा सहेन अप्रधाने इत्येव वक्तुमुचितमास्तोत्। तेन
साकं सार्धं समम् इत्यादिभिः सहार्थैः शब्दैः योगेऽपि
अप्रधाने तृतीया स्यात्। क्रियागुणद्रव्यैः प्रधानाप्रधानयोः
सम्बन्धसूचनाय सहार्थशब्दप्रयोगः कर्तव्यः। स चान्वयः शाब्दः
आर्थश्चेति द्विविधः। क्रियागुणद्रव्यैः यस्य शाब्दिकसम्बन्धो
विद्यते स एव प्रधानः। यस्य तदभावस्तस्य सत्यपि आर्थसम्ब-
न्धे सोऽप्रधानः। तथाहि पुत्रेण सहागतः पिता इत्यत्र आङ्पूर्वात्
गच्छतेः कर्तरि क्तेन क्रियया सह कर्तुः पितुः साक्षादन्वयः
शब्दगम्यः। अतस्तस्य प्राधान्यम्। सहशब्दसमभिव्यवहार-
सामर्थ्यात् आगमनक्रियया पुत्रस्य आर्थः सम्बन्धः
समस्ति। किन्तु शब्दान्वयाभावात् अप्राधान्यम्। तेन तत्र
तृतीया। एवं विशेषेण सह स्थूल उपाध्याय इति गुणेन
शिष्येण सहोपाध्यायः गोमान् इति च द्रव्येण सह अन्वयो-
दाहरणम्। दीक्षितेन तु केवलं क्रियोदाहरणमुपन्यस्तम्। वस्तु-
तस्तु गुणद्रव्योदाहरणयोरपि अस्तिक्रियाध्याहारस्य
कर्तव्यत्वात् तत्सर्वमपि क्रियान्वयोस्योदाहरणम्।

क्वचिद् विनापि सहार्थशब्दयोगं साहित्यार्थस्य
गम्यत्वे अप्रधाने तृतीया स्यात्। 'वृद्धो यूना तल्लक्षणश्चेदेव
विशेषः' इति पाणिनि सूत्रं ज्ञापकम्। तदुक्तं वृत्तौ दीक्षितेन-
'सहार्थेन युक्तेऽप्रधाने तृतीया स्यात्। पुत्रेण सह आगतः
पिता। एवं साकं सार्धं समं योगेऽपि। विनापि तद्योगं
तृतीया स्यात्। "वृद्धो यूना" इत्यादिनिर्देशात्' इति। यथा
साहित्यार्थे सहशब्देन योगे तृतीया स्यात् तथा विद्यमान-
तार्थेऽपि 'सहैव दशभिः पुत्रैर्भारं वहति गर्दभी' इत्युदाहरणम्।

ननु सहागतौ पितापुत्रौ इत्यादिस्थले यत्र द्वयोरपि
क्रियासम्बन्धः शब्दोपस्थाप्यः तत्र द्वयोरपि प्राधान्यात् कुत्र

तृतीया? अत्रोच्यते इष्टापत्तिरियम्। पदमञ्जर्यां हरदत्तेन कथितम्— "यदा द्वयोरपि क्रियासम्बन्धः शब्देनोच्यते सह आगतौ पितापुत्राविति तदा द्वयोरपि प्राधान्याद् भवति। यदा तु एकस्य क्रियातिसम्बन्धः शब्देन प्रतिपिपादयिषति अपरस्य सहार्थान्यथानुपपत्त्या तदा तस्याप्राधान्यात् तद्वाचिनस्तृतीयेति। ननु पुत्रेण सहागतः पिता इत्यादौ पितुरिव पुत्रस्यापि सहार्थसामर्थ्यात् कर्तृत्वे प्रतीते 'कर्तृकरणयोस्तृतीया' इति सूत्रेणैव तृतीया सिद्धा। किं तर्हि प्रस्तुतेन सूत्रेण? अत्रोच्यते तथा सति तिलैः सह माषान् वपति इत्यत्र तिलान् माषान् वपति इत्येवमादयः अनिष्टाः प्रयोगाः दुर्निवार्याः स्युरिति पदमञ्जर्यां प्रपञ्चितम्। महाभाष्यकृतापि अप्रधाने इति पदं प्रत्याख्यातम्। न च प्रधाने तृतीयावारणाय अप्रधाने इति वाच्यम्। प्रातिपदिकार्थमात्रे तत्र प्रथमाया अन्तरङ्गत्वात् बहिरङ्गभूतया तृतीयया तस्या वारणस्य दुःशकत्वात्। न च पुत्रेण सह पितुरागमनमित्यत्र पितृशब्दे तृतीयावारणाय अप्रधाने इति पदं सोपयोगम्। 'कर्तृकर्मणोः कृतिः' इति सूत्रेण विहितायाः षष्ठ्याः सहोपपदप्रयुक्तायास्तृतीयायाः बलीयस्त्वादिति संक्षेपः।

27. ॥ अन्यपदार्थे च संज्ञायाम् ॥

अव्ययीभावसमासप्रकरणे सूत्रमिदं पठितम्। सूत्रार्थनिष्पत्तये 'नदीभिश्च' इति सूत्रतः संख्याविरहितस्य नदीभिरित्यस्य अनुवृत्तिर्भवति। अपि च, 'अव्ययीभावः' 'सह सुपा' 'सुप् समासः' इत्येतेषामपि अनुवर्तनं भवति। तेन अन्यपदार्थे विद्यमानं सुबन्तं नदीभिः सह नित्यं समस्यते संज्ञायामित्यर्थः फलति। सूत्रेऽस्मिन् शर्तद्वयम्-
(१) अन्यपदार्थः प्रधानः स्यात् (२) अन्यपदार्थस्य संज्ञा भवेत्।